ISSN 976-8645

# शास्त्रकाव्यानां सामान्यपरिचायनम्

*विश्वजा नायर,*

संस्कृतभाषायाः आदिकालादारभ्य लब्धाः भूरिशः ग्रन्थाः विद्वद्सूरिभिः काव्यरूपेण निर्मिताः| जगल्लब्धेषु प्रथमग्रन्थतल्लजेषु वेदेषु किं वा तत्रत्येषु मन्त्रेषु काव्यांशाः दृश्यन्ते ? तदनन्तरलब्धाः इतिहासपुराणादयोऽपि काव्यरूपेणैवार्थात् छन्द आदिभिर्युक्ताः लभ्यन्ते ? विषयगौरवेण साकं सर्वशास्त्राणां काव्यरूपकथनं प्राचीनानां सुशैलिरासीदिति निर्णीयते । शीघ्रविषयावगाहनं तथा ग्रन्थपठितॄणां स्मृतौ विषयस्य स्थानलब्धिश्च काव्यरूपकथनस्योद्देश्यं भवेत्तावत् ।

काव्यपदनिरुक्तिविषये पण्डितैः विविधार्थाः कथिताः। कवनीयं काव्यमिति अभिनवगुप्तेन ध्वन्यालोकलोचने भणितम्[१]। काव्यप्रकाशकारः मम्मटभट्टः लोकोत्तरवर्णनानिपुणकविकर्म काव्यमित्युक्तवान्[२]। कौति शब्दायते विमृशति रसभावानिति कविः, तस्य कर्म काव्यमिति भट्टगोपालः[३]। वर्णार्थकात् कवृधातोः अथवा शब्दार्थकात् कुधातोः इप्रत्ययेन (अचः इः, उ.४.१३९) निष्पादितं रूपं कविरिति। कविशब्दात् ष्यञ्प्रत्ययेन (गुणवचनब्राह्मणादिभ्यः कर्मणि च, पा.सू. ५.१.१२४) काव्यम् इति रूपम्।

कविः यां मनोहारिणीं कवितां रचयति, यया कवितया सहृदयाः पूर्णानन्दमनुभवन्ति, तद्भवति काव्यम्। कवित्वं न केवलं वस्तुवर्णनेनैव सफलतां याति , सहृदयरञ्जकत्वेन साकं विज्ञानप्रदानमपि कविधर्म एवेत्यत्र न सन्देहलेशः। शास्त्राण्यपेक्ष्य समानकाल एव विविधोद्देशान् काव्यं निर्वर्त्तयति। उत्तमकाव्यस्य धर्मवैविध्यं, तस्य विविधविषयप्रतिपादकत्वम् आचार्यभामहेन स्वग्रन्थे एवमुक्तम् -

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
प्रीतिं करोति कीर्तिं च साधुकाव्यनिबन्धनम्[४]।। इति।

पुरुषार्थेषु कलासु च विचक्षणतासम्पादनं, सहृदयस्य प्रीतिः उत सहृदयहृदयानन्दः, कवेः कीर्तिलब्धिः च साधुकाव्यस्य रचनायाः प्रयोजनत्वेन सूरिभिः कथितः| एवमनेकैराचार्यैः साधुकाव्यस्य प्रयोजनानि बहुविधैरुक्तानि|

**काव्यभेदाः**

विविधप्रकारेण काव्यभेदान् बहुधा वदन्त्यालंकारिकाः। काव्यं दृश्यश्रव्यभेदेन द्विविधम्[४५] इति केचन वदन्ति। तदनुसृत्य रूपकोपरूपकादयः दृश्यकाव्येऽन्तर्भवन्ति। गद्यपद्यमिश्राः श्रव्यकाव्यभेदाः[५६]। पद्यकाव्यस्य बहवः भेदाः विबुधाः

## Endnotes

१ श्रीमदानन्दवर्धनाचार्यविरचितः ध्वन्यालोकः लोचनेन सहितः, चौखम्बा संस्कृत संस्थान, वाराणसी, २००९, पु.२२.

२ श्रीमम्मटाचार्यविरचितः काव्यप्रकाशः, चौखम्बा संसकृत संस्थान, वाराणसी, २००३, पु.३.

३ काव्यालङ्कारसूत्राणि - वामनविरचितानि, चौखम्बा सुरभारती प्रकाशन, वाराणसी २०१०. पु.३.

४ Kavyalankara of Bhamaha - Motilal Banarsidas Publishers pvt ltd, Delhi, 1991. Page 1, Verse1.2.

वदन्ति। महाकाव्य-खण्डकाव्य-शास्त्रकाव्य-स्तोत्रकाव्य-यमककाव्यादिभेदाः काव्यपरम्परायां दृश्यन्ते। आचार्यक्षेमेन्द्रेण स्वकीये सुवृत्ततिलकनाम्नि ग्रन्थे काव्यविभागविषये एवमुक्तम्-

शास्त्रं काव्यं शास्त्रकाव्यं काव्यशास्त्रं च भेदत:

चतुष्प्रकार: प्रसर: सतां सारस्वतो मत: ।

शास्त्रं काव्यविद: प्राहु: सर्वकाव्याङ्गलक्षणम्

काव्यं विशिष्टशब्दार्थसाहित्यसदलंकृति।

शास्त्रकाव्यं चतुर्वर्गप्रायं सर्वोपदेशकृत्

भट्टिभौमककाव्यानि काव्यशास्त्रं प्रचक्षते।[७]

आचार्यक्षेमेन्द्रमते समग्रं संस्कृतवाङ्मयं चतुःप्रकारकं भवति - शास्त्रं, काव्यं, शास्त्रकाव्यं, काव्यशास्त्रञ्च। आचार्याः सर्वकाव्याङ्गलक्षणयुक्तान् काव्यप्रकाश-साहित्यदर्पणादिग्रन्थान् शास्त्रपदेन कथयन्ति। विशिष्टशब्दार्थयुक्ताः, पद्यं गद्यञ्च, सदलंकृतियुक्ताः रघुवंश-कुमारसंभवादिग्रन्थाः च काव्यनाम्ना तैरुल्लिख्यते। चतुर्वर्गाणामुपदेशात्मकाः, सर्वभावेनोपदेशप्रदायकाः रामायण-महाभारतादिग्रन्थाः शास्त्रकाव्यमित्येवम् आचार्यैः व्यवह्रियते। काव्येन साकं विशिष्टरूपेण शास्त्रतत्त्वमपि निरूपयन्ति कवयश्चेत्तद् काव्यशास्त्रमित्याचार्याः गणयन्ति, यथा भट्टिभौमकधातुकाव्यादयः।

## काव्यशास्त्रम्

क्षेमेन्द्रमते चतुर्विधकाव्यविभागेष्वन्तिमं काव्यशास्त्रम्। सरसस्य कस्यचिदितिवृत्तस्य काव्यरूपेण प्रतिपादनेन सह यत्किञ्चित् शास्त्रमप्याविष्करोति चेत्तत् काव्यशास्त्रमिति प्रसिद्धम्। एतानि समानकाले काव्यस्य तथा शास्त्रस्य च विभिन्नधर्माणां निर्वहणं कुर्वन्ति।

शास्त्राध्येतॄनुद्दिश्य सुखबोधनाय, सम्यगवबोधनाय सर्वशास्त्रेषु एतादृशकाव्यशास्त्राणि पण्डितैः प्राचीनकालात् विरचिताः दृश्यन्ते। कदाचित् शास्त्रग्रन्थेषु मध्ये मध्ये सुगमावबोधाय पद्यानि प्रयुक्तानि दृश्यन्ते। पातञ्जलमहाभाष्ये नैकस्थलेषूदाहरणकथनाय आचार्यैः पद्यांशाः दत्ताः। यथा उपान्मन्त्रकरणे (पा.सू. १.३.२५) इति सूत्रभाष्ये उपतिष्ठतेति पदप्रयोगप्रदर्शनायैकः श्लोकः उपस्थापितः।

"बहूनामप्यचित्तानामेको भवति चित्तवान्,

पश्य वानरसैन्येऽस्मिन् यदर्कमुपतिष्ठते"।[२] [८] इति।

प्रत्युदाहरणरूपेण पुनरेकोऽन्यः श्लोकः प्रदत्तः। एतादृशोदाहरणेभ्यः ज्ञायते यत्शास्त्रबोधनाय तत्कालादारभ्यैव श्लोकाः प्रयुज्यन्तेति।

---

५ दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम् । साहित्यदर्पणम्- चौखम्बा विद्याभवन, वाराणसी, १९९४. पु-३५९

६ गद्यं पद्यं च मिश्रं च तत् त्रिधैव व्यवस्थितम् । काव्यादर्शः - चौखम्बा विद्याभवन, वाराणसी, १९९२. पु-१४

७ Suvrttatilaka of Kshemendra - Dipak Kumar Sharma, New Bharatiya Book Corporation, Delhi, 2007.

Page 63, Verses 2,3,4.

८ महाभाष्यम् - प्रतिभा प्रकाशन, दिल्ली, पुनर्मुद्रण २००१. पु-२२९. सू-१.३.२५,

ISSN 976-8645

संस्कृतसाहित्यग्रन्थेष्वनेके एतादृशाः ग्रन्थाः सन्ति, ये व्याकरण-तर्क-छन्दः-ज्योतिषादिशास्त्राणां सुगमबोधनाय प्रणीताः। शास्त्रे पठितकार्याणं प्रयोगपरिचायनमेतादृशकाव्यानां लक्ष्यम्| क्षेमेन्द्रेण काव्यशास्त्रमिति पदं भट्टिभौमककाव्यावुद्दिश्य प्रयुक्तम्, किन्तु गच्छता कालेन काव्यशास्त्रशब्देन काव्यसिद्धान्तग्रन्था उद्दिष्टाः जाताः, अपि च अन्यैः संस्कृतपण्डितैः शास्त्रकाव्यमिति पदेन भट्टिकाव्य-धातुकाव्यादीन्येवाधिकतया निर्दिष्टानि । तस्माद् अन्यान्यपि शास्त्रकाव्यान्युद्दिश्य पत्रेऽस्मिन् शास्त्रकाव्यमिति पदं आलोच्यते।

**शास्त्रकाव्यग्रन्थाः**

शास्त्रकाव्यपरम्परायामधिकतया व्याकरणशास्त्रकाव्यानि दृश्यन्ते। अन्यशास्त्रानपेक्षया व्याकरणशास्त्रज्ञानस्य प्रधानत्वादेवं दरीदृश्यते । व्याकरणशास्त्रकाव्यप्रणेतॄणां नामानि संगृह्य एकश्लोकः प्रसिद्धो वर्तते।

व्याडिर्मुनित्रयं भट्टिर्भट्टभूमो हलायुधः
हेमचन्द्रो वासुदेवस्तथा नारायणावपि
शास्त्रकाव्यप्रणेतारः शाब्दिकाः कवयः स्मृताः ।[३] ९इति ।

श्लोकानुसारेण व्याडेः बलचरितम्, पाणिनेर्जाम्बवतीविजयम्, कात्यायनस्य स्वर्गारोहणम्, पतञ्जलेर्महानन्दमयम्, भट्टेर्रावणवधम्, भट्टभूमस्य रावणार्जुनीयम्, हलायुधस्य कविरहस्यम्, वासुदेवस्य वासुदेवविजयम्, हेमचन्द्रस्य कुमारपालचरितम्, नारायणभट्टपादस्य धातुकाव्यञ्च व्याकरणशास्त्रकाव्यत्वेन प्रसिद्धाः ग्रन्थाः। एतेष्वादिचत्वारः नामत एव वयं जानीमः। अन्येषां परिचयोऽधः दीयते।

शास्त्रकाव्यपरम्परायां प्रथमस्थाने विराजते रावणवधमित्यपरनाम्ना प्रथितं **भट्टिकाव्यम्**। त्रेतायुगस्थश्रीरामकथया साकं व्याकरणशास्त्रमप्यस्मिन् वर्णितम्। श्रीरामस्य जननादारभ्य रावणवधानन्तरमयोध्याप्रत्यागमनपर्यन्तं चरितं काव्यरूपेणात्र वर्णितम्। अस्य द्वाविंशतिसर्गाः चतुर्षु खण्डेषु विभक्ताः। प्रकीर्णकाण्डम्, अधिकारकाण्डम्, प्रसन्नकाण्डम्, तिङन्तकाण्डमिति ते पुनः क्रमीकृताः। प्रकीर्णाधिकारकाण्डयोरष्टाध्यायीसूत्राण्युदाहरति भट्टिकविः । तृतीयेऽलङ्काराणां तथा चतुर्थे लकारप्रयोगविशेषाणामुदाहरणानि वर्तन्ते। व्याख्यानस्य साहाय्यं विना काव्यमिदमनधीतवैयाकरणानामवगमनाय क्लिष्टकरम्।

भौमककाव्यमित्यपरनाम्ना प्रसिद्धम् काश्मीरकविना भूमभट्टेन विरचितम् **अर्जुनरावणीयम्** व्याकरणशास्त्रकाव्यं शास्त्रकाव्यमण्डले भट्टिकाव्यादनन्तरस्थानं वहति। अद्यावध्युपलब्धेषु काव्यशास्त्रग्रन्थेष्वेतदेवैकः व्याकरणोदाहरणग्रन्थः यस्मिन्नष्टाध्यायीक्रमेणधिकानि सूत्राण्युदाहृतानि। कार्त्तवीर्यार्जुनरावणयोः युद्धकथां कथयन् भूमभट्टः अष्टाध्यायीसूत्रपाठमनुसृत्य सूत्राणामुदाहरणानि क्रमेण श्लोकेषु ग्रथितवान्| अस्मिन् सप्तविंशतिसर्गेषु १७२६ श्लोकेषु २२९० पाणिनीयसूत्राणि तथा कात्यायनविरचितानि पञ्चाशत् वार्तिकानि च क्रमेण उदाहृतानि सन्ति[३] १०।

राष्ट्रकूटवंशस्थराज्ञः तृतीयकृष्णराज्ञः प्रकीर्तनपरं **कविरहस्यम्** नामकव्याकरणशास्त्रकाव्यं हलायुधेन विरचितम्। समानरूपानां धातूनां वर्तमानकालरूपाणामुदाहरणमत्र दृश्यते। अस्य व्याख्यात्रा रविधर्मेण काव्यमिदं कविगुह्यम् वा अपशब्दाभासकाव्यमिति च निर्दिष्टम्। अस्मिन्नाहत्य त्रिशताधिकाः श्लोकाः विद्यन्ते।

आचार्येण हेमचन्द्रेण विरचितः सिद्धहैमशब्दानुशासनमिति संस्कृतप्राकृतव्याकरणग्रन्थः विद्यते। ग्रन्थस्यास्य नियमानामुदाहरणाय तेनैव विरचितं भवति **कुमारपालचरितम्** नामकव्याकरणशास्त्रकाव्यम्। काव्येऽस्मिन्नष्टाविंशतिसर्गेषु

---

९ व्याकरणशास्त्रस्येतिहासाः, पु.२२४. लोकमणिदाहलः, भारतीयविद्या प्रकाशन, दिल्ली, २००७.

१० अ.रा. - समीक्षात्मकमूलपाठसंस्करणम्, राष्ट्रीयसंस्कृतसंस्थानम् मानितविश्वविद्यालयः, नवदेहली,

२००८ ।

चालूक्यवंशाधिपस्य कुमारपालमहाराजस्य चरितं विरचितम्। स अन्तिमाष्टाध्यायान् विहायान्यान् सर्वान् संस्कृतभाषया विरचितवान्, शिष्टान् प्राकृते च। अत एवास्यापरनाम **द्व्याश्रयकाव्यम्** इति।

कविपण्डितमोहनभट्टविरचितं व्याकरणशास्त्रकाव्यं भवति **कंसवधम्**। अस्मिन्नेकविंशतिसर्गाः सन्ति। श्रीकृष्णस्य जन्मप्रभृति कंसवधपर्यन्तं जीवितकथा सप्तशताधिकश्लोकैः वर्णिता। व्याकरणसूत्रनिर्वचनात्मकेऽस्मिन्काव्ये सन्धि-सुबन्त-कारक-समास-तद्धितप्रकरणानि वर्णितानि।

श्रीरामचन्द्रविरचितं **सभ्याभरणम्,** योगेन्द्रनाथतर्कचूडामणिना विरचितं **दशाननवधकाव्यं**, महापण्डितेन दिवाकरेण रचितं **लक्षणादर्शः** नामकव्याकरणशास्त्रकाव्यं, काशीनाथविरचितं **यदुवंशकाव्यं**, विनप्रभसूरिकृतं **श्रेणिकचरितम्,** इत्यादीनि च भारतीयशास्त्रकाव्यपरम्पराऽन्तर्गतानि।

**केरलीयशास्त्रकाव्यानि**

भारतस्य विविधभागेभ्यः शास्त्रकाव्यान्युदितानि| किन्त्वन्यभागापेक्षया केरलेषु शास्त्रकाव्यपरम्परा सुदृढाऽवर्तत। विभिन्नशास्त्रविषयकप्रतिपादकान्यनेकानि शास्त्रकाव्यानि केरलीयैः विरचितानि । एष्वपि पूर्ववत् व्याकरणशास्त्रकाव्यान्येवाधिकानि। शास्त्रकाव्यानां कैरलीलिपिबद्धताडपत्राणामाधिक्यं संरक्षणञ्चावलोक्यते चेत् शास्त्रकाव्याध्यनाध्यापनविषये केरलीयाः न दुर्लभचित्ता इति प्रतीयते।

केरलीयशास्त्रकाव्येषु प्रथमस्थानं वहति ब्रह्मदत्तनारायणस्य व्याकरणशास्त्रकाव्यं **सुभद्राहरणम्**। अस्य कर्ता ब्रह्मदत्तपुत्रनारायणकविः तिरुवेगपुरविप्रः आसीदिति केषाञ्चित् भाष्यम्। पाणिनीयव्याकरणसूत्रोदाहरणपाठनद्वारा कविः महाभारतवर्णितार्जुनसुभद्राहरणकथां कवयति। युधिष्ठिरवर्णनेनास्यारम्भः। दर्शनानाम् अर्थशास्त्रमनुस्मृतिशुक्रनीतीनाञ्च प्रभावः युधिष्ठिरराज्यशासनप्रसङ्गेषु दृश्यते। विंशतिसर्गयुक्तस्यास्य काव्यस्य शास्त्रकाव्यस्वभावं कविनैवं स्पष्टीकृतम्। यथा -

प्रकीर्णकाण्डः प्रथमोऽत्र सर्गो मिश्रः सनाद्यन्तयुतो द्वितीयः।
काण्डं कृतां सर्गचतुष्कमूर्ध्वं सर्गत्रयं तद्धितकाण्डमूर्ध्वम्।
समासकाण्डं दशमस्तु सर्गः सर्गाः परे षट् तु तिङन्तकाण्डं
ततः परं सर्गचतुष्टयन्तु प्रसन्नकाण्डं गुणभूषणाढ्यम्।[२] ११

इति श्लोकैः सम्पूर्णस्य ग्रन्थस्य प्रतिपाद्यविषयः कविनोक्तः।

पेरुमनग्रामस्थः वासुदेवाख्यः कश्चन विप्रः **वासुदेवविजयम्** इति प्रसिद्धस्य व्याकरणशास्त्रकाव्यस्य कर्ताऽभवत्। पाणिनीयव्याकरणसूत्राण्यस्मिन्नुदाहृतानि। लघुकाव्येऽस्मिन् ६५७ श्लोकाः वर्तन्ते किन्तु सूत्रोदाहृतशैलिरन्यव्याकरणोदाहरणकाव्येभ्यः अपेक्षया भिन्ना वर्तते। कविना स्वयमष्टाध्यायीसूत्राणि चतुर्भागेषु विभक्तानि। पुनः प्रत्येकस्मिन् श्लोके चतुर्भागयुक्तानि सूत्राण्युदाहृतानि। तदुक्तं कविनैव स्वकीयटीकायाम्[१] १२ । २१४३ अष्टाध्यायीसूत्राणि, २४९ वार्तिकानि, १० गणसूत्राणि तथा १६ उणादिसूत्राणि चास्मिन्नुदाहृतानि[२]१३। सप्तसर्गेषु भागवतपुराणान्तर्गता श्रीकृष्णावतारकथाऽत्र वर्णिता। ग्रन्थकर्त्रैव पदचन्द्रिका नामव्याख्याऽपि रचिता। धातुकाव्यरचनायै नारायणभट्टपादानां प्रेरणायै च जातमेतत्काव्यम्।

---

११ सुभद्राहरणम्- पु.२.

१२ इह पाणिनीयसूत्रे चत्वारो भागाः परिकल्पिताः। प्रथमद्वितीयाध्यायात्मकः आद्यः। तृतीयाध्यायात्मको द्वितीयः। चतुर्थपञ्चमाध्यायात्मकस्तृतीयः। अवशिष्टाध्यायात्मकश्चतुर्थः। वासुदेवविजयम् - भूमिका, पु.१६.

१३ वासुदेवविजयम् - परिशिष्ट-८, राष्ट्रीयसंस्कृतसंस्थानम् मानितविश्वविद्यालयः, हिमाचल प्रदेश, २००१३.

श्रीमेल्पुत्तूर्नारायणभट्टपादेन कृतमेकं व्याकरणशास्त्रकाव्यं **धातुकाव्यम्** इति। वासुदेवकवे: वासुदेवविजयमिति व्याकरणशास्त्रकाव्यस्यानुबन्धत्वेन विरचितं भवतीदम् । वासुदेवविजयस्योपरि माधवेन विरचितं धातुवृत्तिग्रन्थमाश्रित्य भीमप्रणीतधातुपाठान्तर्गतान् धातून् तदीयक्रमेण चास्मिन्नुदाहरति कविः । कंसदूतस्याक्रूरस्य गोकुलयात्रातः आरभ्य कंसवधान्ता श्रीमद्भागवतकथा काव्यस्यास्येतिवृत्तम्। सर्गत्रयात्मकेऽस्मिन् काव्ये श्रीकृष्णलीला वर्णिता।

स गान्दिनीभूरथ गोकुलैधितं स्पर्धालुधीगाधितकार्यबाधिनम्।
द्रक्ष्यन् हरिं नाधितलोकनाथकं देधे मुदास्कुन्दितमन्तरिन्द्रियम्।[१४]

इति द्वितीयश्लोके भूसत्तायाम्, एधवृद्धौ, स्पर्धसंघर्षे, गाधृप्रतिष्ठालिप्सयोर्ग्रन्थे च, बाधृलोडने, नाधृनाथृयाच्ञोपतापैश्वर्याद्दिषु, दधधारणे, स्कुद्याप्रवणे इत्येवं धातुपाठस्यादिनवधातून् क्रमेणोदाहरति कविः । धातूनां तिङन्तरूपाणि कृदन्तरूपाणि चोदाहरणरूपेण चात्र प्रदर्शितानि। कविः प्रायेणैकस्य धातो: एकमुदाहरणमेव प्रदर्शितवान् किन्तु कदाचित् धातूनामर्थभेदं सूचयितुं पदभेदं प्रकाशयितुं चाधिकरूपाण्युदाहर्तुं स विमुख: नासीत् ।आहत्य चतुश्चत्वारिंशदधिकद्विशत(२४४)पद्यानि धातुकाव्ये सन्ति।

इलत्तूर् रामस्वामिशास्त्रिणा विरचितं भवति **सुरूपराघवम्** इति व्याकरणशास्त्रकाव्यम्। पञ्चदशसर्गयुक्तेऽस्मिन् काव्ये पाणिनीयव्याकरणसूत्राणि उदाहृतानि। सप्तसर्गा: अष्टमसर्गगता: कतिपये श्लोका: एवोपलब्धा:। रामायणमितिवृत्तत्वेन स्वीकृतेऽस्मिन् श्रावणोत्सवादिकेरलीयोत्सवानां विवरणानि च दृश्यन्ते।

**सुगलार्थमाला** नामकव्याकरणशास्त्रकाव्यं पेरुन्तानम्-नारायणन्-नम्पूतिरिना विरचितम्। त्रिंशत्युत्तरैकशतेषु श्लोकेषु लकारार्थभेदाः अस्मिन् वर्णिता:, लकारार्थप्रकरणीयानि पाणिनीयसूत्राणि उदाहृतानि च। एकस्मादाचार्यादध्येतुरेकस्य शिष्यस्यानुभवास्तथा स्वपितुरुपदेशाश्च पितृपुत्रसंवादररूपेण, अस्य काव्यस्य वर्ण्यविषया:।

केनचित् वासुदेवकविना विरचिते **गजेन्द्रमोक्षम्** इति शास्त्रकाव्ये भागवतस्था इन्द्रद्युम्नमोक्षकथा वर्णिता । केदारभट्टस्य वृत्तरत्नाकरमिति छन्दश्शास्त्रग्रन्थस्थानि वृत्तानि पञ्चसु सर्गेष्वत्रोदाहृतानि।

कृष्णलीलाशुककविना तस्य शिष्येण दुर्गाप्रसादयतिना च मिलित्वा कृतं **श्रीचिह्नकाव्यम्** इति शास्त्रकाव्यम् गोविन्दाभिषेक: इत्यपरनाम्नापि प्रथितम्। वररुचे: प्राकृतप्रकाशमिति प्राकृतव्याकरणग्रन्थस्य सूत्राणां व्याख्यानरूपेऽस्मिन् काव्ये द्वादशसर्गा: सन्ति।

परमेश्वरशिवद्विजेन विरचितं **रामवर्ममहाराजचरितं** नामकव्याकरणशास्त्रकाव्यं, कूटल्लूर् नम्पूतिरिणा विरचितं **पाणिनीयसूत्रोदाहरणकाव्यं**, वयस्कर-आर्यन्-नारायणन्-मूसत्-नामक पण्डितेन कृतं सप्तविंशतिपद्ययुक्तं **नक्षत्रवृत्तावलिकाव्यं**, रामपाणिवादेन रचितं श्रीकृष्णगोपिकालीलावर्णनद्वारा अनुष्टुब्वृत्तप्रयोगवर्णनात्मकं सप्तत्यधिकद्विशतश्लोकयुक्तं **रासक्रीडा**ख्यं छन्दशास्त्रकाव्यं, ऋग्वेदीयाष्टकविभागवर्णनात्मकं मेल्पुत्तूर्-नारायणभट्टपादेन कृतं देवीस्तुतिपरं **सूक्तश्लोका:** इत्याख्यं वैदिकशास्त्रकाव्यं, रामायणीयाः कस्याश्चित् कथायाः इतिवृत्तत्वेन वर्णितं **हेत्वाभासोदाहरणम्** इत्याख्यं गोदवर्म-इलयतम्पुरान् -नामपण्डितेन कृतं तर्कशास्त्रकाव्यं, पय्यूर्-पट्टेरि -ऋषिपुत्रपरमेश्वरेण विरचितं **हरिचरितं**, तत्पुत्रवासुदेवविरचिता **वाक्यावली** इति द्वे ज्योतिश्शास्त्रकाव्ये च केरलीयशास्त्रकाव्यपरम्परायामागतानां विविधशास्त्रकाव्यानामुदाहरणानि सन्ति।

## उपसंहारः

प्राचीनकालादेव काव्यद्वारा शास्त्रपठनरीतिः प्रचारे अवर्तत| विविधकाव्याशाखासु प्रधानैका भवति शास्त्रकाव्यानां शाखा । काव्यास्वादनादुपरि पठितस्य शास्त्रस्य काव्यरूपत्वदर्शनेन जातं प्रत्यभिज्ञारसम् एव शास्त्रकाव्यानि प्रददति।

१४ प्रक्रियासर्वस्वम,पु- xxxvi, गुरुवायूर् देवस्वम्, गुरुवायूर्, केरलम्, १९९८।

 ISSN 976-8645

अन्यशास्त्रज्ञानाय व्याकरणमपेक्षितमित्यतः स्यात्, व्याकरणशास्त्रकाव्यान्येवाधिकानि लभ्यन्त इति । अस्मिन् पत्रे शास्त्रकाव्यशाखा, कानिचन प्रसिद्धकाव्यशास्त्राणि, केरलेषु प्रसिद्धाः शास्त्रकाव्यग्रन्थाश्च विशदीकृताः।

## सन्दर्भग्रन्थावलिः


1. अर्जुनरावणीयम् (काश्मीरमहाकविभूमभट्टविरचितम्) - समीक्षात्मकमूलपाठसंस्करणम्, सं. - विजयपालशास्त्री शिवचन्दसूनुः, संस्कृतवर्षस्मृतिग्रन्थमाला-१२, राष्ट्रीयसंस्कृतसंस्थानम् मानितविश्वविद्यालयः, नवदेहली, २००८.
2. केरलसाहित्यचरित्रम्, उल्लूर् एस्.परमेश्वरय्यर्, केरलसर्वकलाशाला, तिरुवनन्तपुरम्, केरलम्, १९९०|
3. प्रक्रियासर्वस्वम्(श्रीनारायणभट्टपादप्रणीतम्), सं-के.पी.नारायणपिषारोटी, प्र- गुरुवायूर् देवस्वम्, गुरुवायूर्, केरलम्, १९९८|
4. भट्टिकाव्यम् - भट्टिविरचितम्, (व्या)पण्डित श्रीशेषराजशर्मा शास्त्री, नवमसंस्करण, चौखम्बासंस्कृतसीरीस् ओफीस्, वाराणसी १९८८।
5. वासुदेवविजयम् - सम्पादकः विजयपालशास्त्री शिवचन्दसूनुः, वेदव्यासपरिसरग्रन्थमाला-२, राष्टियसंस्कृतसंस्थानम्, हिमाचलप्रदेश, २०१३
6. व्याकरणशास्त्रेतिहासः - लोकमणिदाहलः, भारतीयविद्या प्रकाशन, दिल्ली, २००७.
7. History of Classical Sanskrit Literature - Krishnamachariar M., Motilal Banarsidas Publishers pvt ltd, Delhi, 2009.